वेददी० ४ब्राह्ममुहूर्त्ते "उषावै अश्वस्य मेध्यस्य विव्याध" छ०उ०। "उषा ब्राह्मो मुहूर्त्तकालः"शं०भा०। ५दिवोदुहितृदेवतायाम् स्त्री प्रौढ़मनोरमा।

**उषसी** स्त्री उषं तापकत्वात् दिवसं स्यति सो—क गौरा० ङीष्। सायं सन्ध्यायाम् मेदिनिः।

**उषस्ति** पु०ऋषिभेदे"उषस्तिर्ह चाक्रायणः" छा०उ०। उषस्तोऽप्यत्र"अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ" "ततो होषस्तश्चाक्रायण उपरराम"इति च शत०ब्रा०१४,६,५,१।

**उषा** स्त्री ओषत्यन्धकारम् उष+क। १प्रातरादिसन्ध्यासु"वेनीरनुव्रतमुषास्तिस्रः"ऋ०८,४१,३। तिस्रःप्रातःसायं मध्याह्नप्रकृपा उषाः"भा०।"उषा विभातीरनु भासि पूर्वीः" ३,६,७, "तेजःपरिहानिरुषा भानोरर्द्धोदयं यावत्"वृ० सं०उक्ते २काले नक्षत्रप्रभाक्षयः काल उषा। तेन पञ्चपञ्चाशद्घटिकोत्तरमारभ्य सूर्य्यार्द्धोदयपर्य्यन्तः स कालः। लग्नाद्यलाभे उषाकाले यात्रा शस्ता यथाह ज्यो० "प्रत्युषद्युतितारका स्फुटतटी प्राची भवेन्निर्म्मला त्वीषद्रक्तविलोहितान्तशबला दैवैः सदा वाञ्छिता। नो वारं न तिथिं न योगकरणं लग्नञ्च नापेक्षते हत्वा दोषसहस्रसञ्चयमुषा नूनं करोत्युन्नतिमिति"। "तिथ्यादिषु निषिद्धेषु चन्द्रताराविलोमतः। उषां गोधूलियोगं वा स्वीकृत्य गमनं चरेत्। प्राच्यामुषां प्रतीच्याञ्च गोधूलिं वर्जयेन्नृप।। दक्षिणेऽभिजितं चैवमुत्तरे च निशां तथा"। "आरक्तबिम्बं रजनीविरामं वदन्त्युषायोगमिह प्रवीणाः। व्यासः" "आहुः प्रयातुः सकलार्थसिद्धिः संलक्ष्यते हस्ततलस्थितेव"ज्यो०त०व्यासः।अन्धकारेण सन्तापकारिण्यां ३रात्रौ मेदि० "अधिकरुचिरशेषामप्युषां जागरित्वा" माघः। ४वारभूमौ। ततः क्वचित् गौरा० ङीष्। "भसन् स्तुतं कुहकराड्मिवोषसुष्याम्"भाग० ५स्त्रीगव्यां हेम० ६उखायां विश्वः ७स्थाल्यां रमानाथः। ८बाणराजसुतायाञ्च तत्र दीर्घादित्वमपि भारतादौ तथैव निर्द्देशात्। तया च यथा अनिरुद्धः पतित्वेनाप्तः तथा वर्णितं भाग०१०स्क०६२अ०यथा (वाणस्य) "तस्योषा नाम दुहिता स्वप्ने प्राद्युम्निना रतिम्। कन्या लब्धतकान्तेन प्रागदृष्टश्रुतेन सा। सा तत्र तमपश्यन्ती क्वासि कान्तेति वादिनी। सखीनां मध्य उत्तस्थौ विह्वला व्रीड़िता भृशम्। वाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता। सख्यपृच्छत् सखीं सूषः कौतूहलसमन्विता। कं त्वं मृगयसे सुभ्रु! कीदृशस्ते मनोरथः। हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये। उषोवाच। दृष्टः कश्चिन्नरः स्वप्ने श्यामः कमललोचनः। पीतवासा बृहद्बाहुर्योषितां हृदयङ्गमः। तमहं मृगये कान्तं पाययित्वाऽधरं मधु। क्वापि यातः स्पृहयतीं क्षिप्त्वा मां वृजिनार्णवे। चित्रलेखोवाच। व्यसनमपकर्षामि त्रिलोक्यां यदि भाव्यते। तदानेष्ये नरं! यस्ते मनोहर्त्ता तमादिश। इत्युक्त्वा देवगन्धर्व्वसिद्धचारणपन्नगान्। दैत्यविद्याधरान् यक्षान् मनुष्यांश्च तथाऽलिखत्। मनुजेषु च सा वृष्णीन् शूरमानकदुन्दुभिम्। व्यलिखत् रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता। अनिरुद्धं विलिखितं वीक्ष्योषाऽवाङ्मुखी ह्रिया। सोऽसावसाविति प्राह स्मयमाना महीपते!। चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी। ययौ विहायसा राजन्! द्वारकां कृष्णपालिताम्। तत्र सुप्तं सुपर्य्यङ्के प्राद्युम्निं योगमास्थिता। गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत्। सा च तं सुन्दरवरं विलोक्य मुदितानना। दुष्प्रेक्ष्ये स्वगृहे पुंसा रेमे प्राद्युम्निना समम्। परार्द्ध्यवासःस्रग्गन्धधूपदीपासनादिभिः। पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषयार्च्चितः। गूढः कन्यापुरे शश्वत् प्रवृद्धस्नेहया तया। नाहर्गणान् स बुबुधे उषयोपहृतेन्द्रियः" विस्तरस्तु हरिवं०१७६अ०। प्रातःकाले अव्य० मेदि०अव्ययत्वात् ततो भवार्थे ट्युल् तुट च्। उषातन तद्भवे त्रि० स्त्रियां ङीप्।

**उषाकल** पु०उषायां कलोरवो यस्य। कुक्कुटे।

**उषापति** पु०६त०। कृष्णपौत्रे प्रद्युम्नपुत्रे यदुवंश्ये अनिरुद्धे तत्पतित्वप्राप्तिकथा उषाशब्दे उक्ता उषानाथादयोऽप्यत्र, अमरे "अनिरुद्ध उषापतिरिति" ह्रस्वपाठः भारतादौ तु दीर्घपाठः।

**उषित** त्रि० वस क्त। १पर्य्युषिते २कृतवासे च। उष–दाहे क्त। ३दग्धे मेदि०। ४त्वरिते धरणिः। भावे क्त। ५वासे न० "चाण्डालैरुषितं यत्र" शु०त० देवलः।

**उषीर** पुंन० उष–कीरच्। वीरणमूले रायमुकुटः।

**उष्ट्र** पु० उक्ष–सेचने ष्ट्रन् वेदे नेट्। १सम्यक्सेक्तरि बलीवर्द्दे। तस्यामोघवीर्य्यत्वात् तथात्वम् "ओष्टारौ वा" कात्या० ५,११,१२। "ओष्टारौ महाबलीवर्द्दौ"कर्कः। आ+सम्यक् उष्टारौ इति विग्रहः। "उष्टारेव फर्वरेषु श्रयेथे" ऋ० १५,१०६,२। लोके तु उक्षिन्न इत्येव। सेक्तरि त्रि० स्त्रियां ङीप्।

**उष्ट्र** पुंस्त्री० उष+ष्ट्रन् किच्च। (उट) प्रसिद्धे पशुभेदे